## पञ्चमः पाठः

CDJNXP

### मम विद्यालयः

उषा-चेतने। तव विद्यालयः कुत्रास्ति ?

चेतना-मम विद्यालयः अत्र एव नगरे अस्ति। तत्र एकः सुन्दरः पुस्तकालयः एकं विशालं क्रीडाड.गणं च स्तः।

उषा-अस्तु। तव विद्यालयस्य पुस्तकालये कीदृशानि पुस्तकानि सन्ति ?

चेतना-मम विद्यालयस्य पुस्तकालये विविधानां विषयाणां पुस्तकानि सन्ति।

उषा-समीचीनम्। तव विद्यालये कति शिक्षकाः सन्ति ?

चेतना- मम विद्यालये पञ्चशिक्षकाः सन्ति। ते सर्वे महर्षितुल्याः,कर्तव्यपरायणा, शिष्यवत्सलाश्च सन्ति।

उषा-किं तत्र विद्यालयोद्यानमपि अस्ति ?

चेतना-एवम्। मम विद्यालये एकं सुन्दरम् उद्यानम् अस्ति। यत्र मनोहराणि पुष्पाणि विकसन्ति।

उषा- तव विद्यालये अन्यत् किमस्ति ?

चेतना- मम विद्यालये संगणककक्षः अपि अस्ति।

उषा-समीचीनम्। तव वस्त्राणि तु नूतनानि दृश्यन्ते । कुतः स्वीकृतवती ?

चेतना- किं त्वं न जानासि यत् मम विद्यालये सर्वेभ्यः छात्रेभ्यः निःशुल्कं पुस्तकं, स्यूतं, पादत्राणं, वस्त्राणि च दीयन्ते।

उषा- तर्हि बहु सम्यक्। एवं श्रूयते यत् तव विद्यालये मध्याह्न भोजनमपि लभ्यते ?

चेतना-सत्यमुक्तं त्वया। मम विद्यालये प्रतिदिनं निःशुल्कं भोजनं लभ्यते। एतदर्थं एका पाकशाला अस्ति। तत्र धनेश्वरी सुशीला किशोरी चेति तिस्त्रः भोजन निर्माणं कुर्वन्ति।

उषा- बहूत्तमम्। तर्हि तव विद्यालयः उत्तमः।

चेतना-आम्। निश्चयेन मम विद्यालयः उत्तमः। मम विद्यालयस्य परीक्षाफलं प्रतिवर्षं श्रेष्ठं भवति। तत्र पठित्वा अहम् आत्मानं गर्वम् अनुभवामि।

उषा-सत्यम्। एवंविधाः विद्यालयाः एव देशस्य गौरवं वर्धयन्ति।



शब्दार्थः

**कति** = कितने। **समीचीनम** = बहुत अच्छा। **क्रीडाङ्.गणम्**= खेल का मैदान। **संगणककक्षः** =कम्प्यूटर कक्ष।**नूतनानि** =नयी। **स्यूतः** =स्कूल बैग। **पादत्राणं** = जूता। **पादकोशः** = मोजा। **पाकशाला** = रसोईघर। **आत्मानम्** = अपने को। **एवं विधा** =इस प्रकार। **ते** = तुम्हारे।**वर्धयन्ति** = बढ़ाते हैं।

अभ्यासः-पञ्चमः पाठः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

क्रीडाङ्.गणम्, शिष्यवत्सलाश्च, कत्र्तव्यपरायणाः, मनोहराणि, संगणकम्, बहूत्तमम्।

**2.पूर्ण वाक्येन उत्तरत-**

यथा- विद्यालये विशालं किम् अस्ति ? विद्यालये विशालं क्रीडाङ्.गणम्,अस्ति

(क) विद्यालये कति शिक्षकाः सन्ति ?

(ख उषा वस्त्राणि कुतः स्वीकृतवती ?

(ग) विद्यालये प्रतिदिनं किं लभ्यते ?

(घ) विद्यालयस्य प्रतिवर्षंपरीक्षाफलं कथं भवति ?

**3. सन्धिं कुरुत-**

यथा- विद्या+ आलयः = विद्यालयः

धऩ +ईश्वरी = धनेश्वरी

कुत्र +अस्ति = .................

मह़ा +ऋषिः =.................

पुस्तक़+ आलयः =.................

विद्यालय+ उद्यानम = .................

**ध्यातव्यम्-** पढ़ा,देखा, किया था इत्यादि हिन्दी क्रियापदेभ्यः लड्.लकारस्य प्रयोगः भवति। यथा- अपठत् अपश्यत् अकरोत् आसीत्-सः पाठम् अपठत् (उसने पाठ पढ़ा)

**4-अधोलिखितानि वाक्यानि एकवचने परिवर्तयत-**

लट्लकारः लट्लकारः

यथा- ते लेखं् लिखन्ति। सः लेखं लिखति।

ते उद्यानं गच्छन्ति। .................................

वयं क्रीडाड्.गणं गच्छामः। .................................

वयं प्रश्नं पृच्छामः। .................................

ते भोजनं कुर्वन्ति। .................................

**5-मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

*पुस्तकालयः कुत्र, पुष्पाणि, उद्यानम्*

(क) विद्यालयः...............अस्ति ?

(ख) तत्र एकः सुन्दरः...............अस्ति।

(ग) उद्याने मनोहराणि.........विकसन्ति।

(घ) विद्यालये सुन्दरम्..........अस्ति।

**6-संस्कृत भाषायाम् अनुवादं कुरूत-**

यथा- मैंने पाठ पढ़ा। अहं पाठम् अपठम्।

(क) उसने भोजन किया।

(ख) उन्होंने दूध पिया।

(ग) आप लोग घर गये।

**7-मम प्रिय शिक्षकः उपरि वाक्यानि लिखत।**

**शिक्षण-सङ्.केत-**कक्षायां छात्रः पाठानुरूपं शुद्धोच्चारणपूर्वकं संवाद कारयत।

**स्मरणीयम्-**

पञ्च विद्यार्थिलक्षणानि- काकचेष्टा, वकोध्यानम्, श्वाननिद्रा, अल्पाहारी, गृहत्यागी।

**तमसो मा ज्योतिर्गमय।**